# Rishi Agastyaproktam Shivapujasadhanani 2 Shivarchane Pushparpanopadesham

# ઋષિ અગસ્ત્યપ્રોક્તં શિવપૂજાસાધનાનિ ૨ શિવાર્ચને પુષ્પાર્પણોપદેશમ્

## Document Information

Text title : Rishi Agastyaproktam Shivapujasadhanani 2 Shivarchane Pushparpanopadesham

File name : shivapUjAsAdhanAni2shivArchanepuShpArpaNopadesham.itx

Category : shiva, shivarahasya, pUjA, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 153.2-167.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# ઋષિ અગસ્ત્યપ્રોક્તં શિવપૂજાસાધનાનિ ૨ શિવાર્ચને પુષ્પાર્પણોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
પલાશપુષ્પૈર્યઃ કુર્યાદ્વસન્તે શઙ્કરાર્ચનમ્ ॥ ૧૫૩.૨॥

દેવેન્દ્રત્વમવાપ્નોતિ સ્વર્ગેશત્વાભિલાષુકઃ ।
ગ્રીષ્મે તુ મલ્લિકાપુષ્પૈર્યઃ કુર્યાચ્છઙ્કરાર્ચનમ્ ॥ ૧૫૪॥

બ્રહ્મત્વં સમવાપ્નોતિ બ્રહ્મત્વં યદિ વાઞ્છતિ ।
વર્ષર્તૌ કુશપુષ્પૈર્યઃ પૂજયિષ્યતિ શઙ્કરમ્ ॥ ૧૫૫॥

સ વિષ્ણુત્વમવાપ્નોતિ યદિ વિષ્ણુત્વમિચ્છતિ ।
શરત્કાલે મહાદેવં યઃ પદ્મૈઃ પૂજયિષ્યતિ ॥ ૧૫૬॥

સ સૂર્યત્વમવાપ્નોતિ યદિ સૂર્યત્વમિચ્છતિ ।
અર્કપુષ્પમહાદેવં હેમન્તેઽયોઽર્ચયિષ્યતિ ॥ ૧૫૭॥

સ ચન્દ્રત્વમવાપ્નોતિ યદિ ચન્દ્રત્વમિચ્છતિ ।
શૈશિરે કરવીરૈર્યઃ પૂજયિષ્યતિ શઙ્કરમ્ ॥ ૧૫૮॥

ગાણપત્યમવાપ્નોતિ ગાણપત્યં યદીચ્છતિ ।
ઉક્તર્તુષૂક્તકુસુમૈઃ શઙ્કરં યોઽર્ચયિષ્યતિ ॥ ૧૫૯॥

ત્રિકાલમપ્રમાદેન સ તદુક્તફલં ભજેત્ ।
બિલ્વપત્રૈઃ સમભ્યર્ચ્ય સર્વર્તુષુ સદાશિવમ્ ॥ ૧૬૦॥

સ્વાભીષ્ટફલમાપ્નોતિ મહાદેવપ્રસાદતઃ ।
દ્રોણપુષ્પૈઃ પૂજનીયઃ કાર્તિકે માસિ શઙ્કરઃ ॥ ૧૬૧॥

અર્કપુષ્પૈર્માર્ગશીર્ષે પૂજનીયઃ સદાશિવઃ ।
પુષ્યે પુનર્વસુપુષ્પૈઃ પૂજનીયઃ સદાશિવઃ ॥ ૧૬૨॥

માઘે ધુત્તૂરકુસુમૈઃ પૂજનીયો મહેશ્વરઃ ।

શમીપુષ્પૈઃ પૂજનીયઃ ફાલ્ગુને માસિ શઙ્કરઃ ॥ ૧૬૩॥

ચૈત્રે પલાશકુસુમૈઃ પૂજનીયો મૃડઃ પ્રભુઃ ।
વૈશાખે મલ્લિકાપુષ્પૈર્જ્યેષ્ઠે કુન્દૈર્નવંસ્તથા ॥ ૧૬૪॥

આષાઢે વિરજાપુષ્પૈઃ શ્રાવણે કુટજૈરપિ ।
પૂજ્યો ભાદ્રપદે કાશૈરાશ્વિજે પારિજાતકૈઃ ॥ ૧૬૫॥

ચૈત્રે દમનકૈશ્ચાપિ પૂજનીયો યમાન્તકઃ ।
તત્તત્સમયજૈઃ પુષ્પૈઃ વૈશાખાદિષુ પલ્લવૈઃ ॥ ૧૬૬॥

યઃ પૂજયતિ યત્નેન સ મોક્ષમધિગચ્છતિ । ૧૬૭.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિ અગસ્ત્યપ્રોક્તં શિવપૂજાસાધનાનિ ૨ - શિવાર્ચને પુષ્પાર્પણોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૧૫૩.૨-૧૬૭।૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 153.2-167.1..

Notes:
Ṛṣi Agastya ઋષિ અગસ્ત્ય delivers Upadeśa ઉપદેશ (to Dvija દ્વિજ) about Puṣpārpaṇa પુષ્પાર્પણ during worship of Śiva શિવ for each Ṛtu ઋતુ and Māsa માસ.
The Adhyāyaḥ 26 અધ્યાયઃ ૨૬ has several other details about Śivapūjāsādhanāni શિવપૂજાસાધનાનિ.

Proofread by Ruma Dewan

*Rishi Agastyaproktam Shivapujasadhanani 2 Shivarchane Pushparpanopadesham*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*